: BOOK MADE AVAILABLE FOR DIGITIZATION BY :

BRAHMVARCHAS SHODH SANSTHAN
SHANTIKUNJ, HARIDWAR, INDIA

: OUR MAIN CENTERS :

Shantikunj, Haridwar,
Uttaranchal, India – 249411
Phone no : 91-1334- 260602,
Website : www.awgp.org
E-mail : shantikunj@awgp.org

Gayatri Tapobhumi,
Mathura, U.P., India – 281003
Phone no : 91-0565-2530128,
Website : www.awgp.org
E-mail : yugnirman@awgp.org

www.awgp.org
www.vicharkrantibooks.org

: BOOK DIGITIZED BY :

Vicharkranti Pustakalay, Thana-Faliya, Dindoligam, Surat-394210, Gujarat, India
E-mail: vicharkranti.awgp@gmail.com | Website : www.vicharkrantibooks.org

www.awgp.org | www.vicharkrantibooks.org

# दीप यज्ञ मंत्राः

## (१) पवित्रीकरणम्

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुनातु, पुण्डरीकाक्षः पुनातु, पुण्डरीकाक्षः पुनातु।

## (२) शिखावन्दनम्

ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते।
तिष्ठ देवि शिखामध्ये तेजोवृद्धि कुरुष्व मे ॥

## (३) प्राणायामः

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।
ॐ आपोज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वः ॐ।

## (४) न्यासः

ॐ वाङ् मे आस्येऽस्तु (मुख को)। ॐ नसोर्मे प्राणोऽस्तु (नासिका के दोनों छिद्रों को) ॐ अक्ष्णोर्मे चक्षुरस्तु (दोनों नेत्रों को) ॐ कर्णयोर्मे श्रोत्रमस्तु (दोनों कानों को) ॐ बाह्वोर्मे बलमस्तु (दोनों बाहों को) ॐ ऊर्वोर्मे ओजोऽस्तु (दोनों जंघाओं को) ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु। (सम्पूर्ण शरीर पर छिड़कें)।

## (५) व्रतबंधनम्

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

## (६) चन्दनधारणम्

ॐ चन्दनस्य महत्पुण्यं पवित्रं पापनाशनम्।
आपदां हरते नित्यं लक्ष्मीस्तिष्ठति सर्वदा ॥

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

www.awgp.org | www.vicharkrantibooks.org


## ( ७ ) गुरु वन्दना

ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।

## (८) कलशपूजनम्

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।१।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।२।।
अंगैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्ति पुष्टिकरी सदा ।।३।।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।।४।।
आदित्याः वसवो रुद्राः विश्वेदेवाः सपैतृकाः ।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।।५।।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ! ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।६।।

## (९) पूजनम्

ॐ सर्वेभ्यो देवेभ्यो नमः आवाहयामि, स्थापयामि, पूजयामि । जलं, गन्धाक्षतं, पुष्पं, धपं, दीपं, नैवेद्यं समर्पयामि ।

## (१०) सर्वदेवनमस्कारम्

ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ।
ॐ लक्ष्मीनारायणाभ्यान्नमः । ॐ उमामहेश्वराभ्यान्नमः ।
ॐ वाणीहिरण्यगर्भाभ्यान्नमः । ॐ शचीपुरन्दराभ्यान्नमः ।
ॐ मातृपितृचरणकमलेभ्यो नमः । ॐ कुलदेवताभ्यो नमः ।
ॐ इष्टदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः ।
ॐ स्थानदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः
ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

ॐ सर्वेभ्यस्तीर्थेभ्यो नमः । ॐ एतत्कर्मप्रधानश्रीगायत्री-
ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु । देव्यै नमः ।

## ( ११ ) स्वस्तिवाचनम्

ॐ गणानां त्वा गणपति ँ हवामहे प्रियाणां त्वा प्रियपति ँ हवामहे निधीनां त्वा निधिपति ँ हवामहे वसोमम आहम-जानि गर्भधमात्वमजासि गर्भधम् ॥१॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥२॥

ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥३॥

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥४॥

ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥५॥

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥६॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रम् तन्न आसुव ॥७॥ ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

## ( १२ ) अग्निस्थापनम्

ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवांआसादयादिह । ॐ अग्नये नमः । अग्निमावाहयामि, स्थापयामि, पूजयामि, ध्यायामि ।

## ( १३ ) गायत्री स्तवनम्

ॐ यन्मण्डलं दीप्तिकरं विशालम् रत्नप्रभं तीव्रमनादिरूपम् । दारिद्र्य दुःखक्षयकारणं च, पुनातु मां तत्सवितुर्वरेण्यम् ॥१॥

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

यन्मंडलं देवगणैः सुपूजितम् विप्रैः स्तुतं मानवमुक्तिकोविदम् ।
तं देवदेवं प्रणमामि भर्गं, पुनातु मां तत्सवितुर्वरेण्यम् ॥२॥
यन्मंडलं ज्ञानघनं त्वगम्यं, त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।
समस्ततेजोमय दिव्यरूपम्, पुनातु मां तत्सवितुर्वरेण्यम् ॥३॥
यन्मंडलं गूढमतिप्रबोधम्, धर्मस्य वृद्धिं कुरुते जनानाम् ।
यत् सर्वपापक्षयकारणं च, पुनातु मां तत्सवितुर्वरेण्यम् ॥४॥
यन्मंडलं व्याधिविनाशदक्षम्, यदृग् यजुः सामसु सम्प्रगीतम् ।
प्रकाशितं येन च भूर्भुवः स्वः, पुनातु मां तत्सवितुर्वरेण्यम् ॥५॥
यन्मंडलं वेदविदो वदन्ति, गायन्ति यच्चारणसिद्धसंघाः ।
यद्योगिनो योगजुषां च संघाः, पुनातु मां तत्सवितुर्वरेण्यम् ॥६॥
यन्मंडलं सर्वजनेषु पूजितं, ज्योतिश्च कुर्यादिह मर्त्यलोके ।
यत्काल कालादिमनादिरूपम्, पुनातु मां तत्सवितुर्वरेण्यम् ॥७॥
यन्मंडलं विष्णुचतुर्मुखास्यं, यदक्षरं पापहरं जनानाम् ।
यत्कालकल्पक्षयकारणं च, पुनातु मां तत्सवितुर्वरेण्यम् ॥८॥
यन्मंडलं विश्वसृजां प्रसिद्धं, उत्पत्तिरक्षाप्रलयप्रगल्भम् ।
यस्मिन् जगत संहरतेऽखिलं च, पुनातु मां तत्सवितुर्वरेण्यम् ॥९॥
यन्मण्डलं सर्वगतस्य विष्णोः, आत्मा परं धाम विशुद्धतत्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्यं, पुनातु मां तत्सवितुर्वरेण्यम् ॥१०॥
यन्मण्डलं ब्रह्मविदो वदन्ति, गायन्ति यच्चारणसिद्धसंघाः ।
यन्मंडलं वेदविदः स्मरन्ति, पुनातु मां तत्सवितुर्वरेण्यम् ॥११॥
यन्मंडलं वेदविदोपगीत, यद्योगिनां योगपथानुगम्यम् ।
तत्सर्ववेदं प्रणमामि दिव्यं, पुनातु मां तत्सवितुर्वरेण्यम् ॥१२॥

## ( १४ ) गायत्रीमन्त्रोच्चारणम्

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो
यो नः प्रचोदयात् ।

## ( १५ ) संकल्प

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य,

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

www.awgp.org | www.vicharkrantibooks.org


विष्णोराज्ञया प्रवर्तमानस्य, अद्यश्रीब्रह्मणोऽह्नि द्वितीये परार्धे, श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरे भूर्लोके, भरतखण्डे, आर्यावर्तैकदेशान्तर्गते, ····क्षेत्रे मासानां मासोत्तमे मासे···· मासे···· पक्षे ···· ···· तिथौ ···· ···· वासरे···· ···· गोत्रोत्पन्नः ···· ···· नामाहं महाकालेच्छया युगप्रत्यावर्तनप्रक्रियान्तर्गते व्रतधारीप्रज्ञा-पुत्रकर्त्तव्यनिर्वाहार्थं श्रद्धानिष्ठापूर्वकः सुदृढं संकल्पमहं करिष्ये ।

## ( १६ ) पूर्णाहुतिः

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ १ ॥
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणा वहा इषमूर्जꣳशतक्रतो स्वाहा ॥ २ ॥
ॐ सर्वं वै पूर्णꣳस्वाहा ।

## ( १७ ) आरती

ॐ यं ब्रह्मवेदान्तविदो वदन्ति,
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गते कारणमीश्वरं वा,
तस्मै नमो विघ्नविनाशनाय ॥
ॐ यं ब्रह्मावरुणेन्द्ररुद्रमरुतःस्तुन्वन्ति दिव्यैःस्तवै-
र्वेदैःसांगपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थित तद्गतेन मनसा पश्यन्ति यं योगिनो,
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥

## ( १८ ) ज्योतिः उपस्थानम्

ॐ तनूपा अग्नेऽसि तन्वं मे पाहि ।
ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि ।
ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि ।
ॐ अग्ने यन्मे तन्वा ऊनन्तन्म आपृण ।
ॐ मेधां मे देवः सविता आदधातु ।

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

www.awgp.org | www.vicharkrantibooks.org


ॐ मेधां मे देवी सरस्वती आदधातु ।
ॐ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ ।

## ( १९ ) भस्मधारणम्

ॐ त्र्यायुषं जमदग्नेरिति ललाटे ।
ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ।
ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ।
ॐ तन्नो अस्तु त्र्यायुषमिति हृदि ।

## ( २० ) साष्टांगनमस्कारम्

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

## ( २१ ) शुभकामना

ॐ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥२॥

## ( २२ ) अभिसिंचनम्

ॐ द्यौः शान्तिरंतरिक्ष(ँ)शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व(ँ)शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥
ॐ शान्तिः । शान्तिः । शान्तिः ॥ सर्वारिष्टा सुशान्तिर्भवतु ।

## ( २३ ) सूर्यार्घ्यदानम्

ॐ सूर्यदेव सहस्रांशो तेजो राशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥

## ( २४ ) विसर्जनम्

ॐ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

# हमारा युग-निर्माण-सत्संकल्प

हम ईश्वर को सर्वव्यापी, न्यायकारी मानकर, उसके अनुशासन को अपने जीवन में उतारेंगे ।

शरीर को भगवान का मंदिर समझकर, आत्मसंयम और नियमितता द्वारा आरोग्य की रक्षा करेंगे ।

मन को कुविचारों और दुर्भावनाओं से बचाए रखने के लिए, स्वाध्याय एवं सत्संग की व्यवस्था रखे रहेंगे ।

इन्द्रिय--संयम, अर्थ--संयम, समय--संयम और विचार-संयम का सतत अभ्यास करेंगे ।

अपने आप को समाज का एक अभिन्न अंग मानेंगे और सबके हित में अपना हित समझेंगे ।

मर्यादाओं को पालेंगे, वर्जनाओं से बचेंगे, नागरिक कर्तव्यों का पालन करेंगे और समाजनिष्ठ बने रहेंगे ।

समझदारी, ईमानदारी, जिम्मेदारी और बहादुरी को जीवन का एक अविच्छिन्न अंग मानेंगे ।

चारों ओर मधुरता, स्वच्छता, सादगी एवं सज्जनता का वातावरण उत्पन्न करेंगे ।

अनीति से प्राप्त सफलता की अपेक्षा, नीति पर चलते हुए, असफलता को शिरोधार्य करेंगे ।

मनुष्य के मूल्यांकन की कसौटी, उसकी सफलताओं,

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org

www.awgp.org | www.vicharkrantibooks.org

योग्यताओं एवं विभूतियों को नहीं, उसके सद्विचारों और सत्कर्मों को मानेंगे।

दूसरों के साथ वह व्यवहार न करेंगे, जो हमें अपने लिए पसन्द नहीं।

नर, नारी परस्पर पवित्र दृष्टि रखेंगे।

संसार में सत्प्रवृत्तियों के पुण्य प्रसार के लिए, अपने समय, प्रभाव, ज्ञान, पुरुषार्थ एवं धन का एक अंश नियमित रूप से लगाते रहेंगे।

परम्पराओं की तुलना में विवेक को महत्त्व देंगे।

सज्जनों को संगठित करने, अनीति से लोहा लेने और नवसृजन की गतिविधियों में पूरी रुचि लेंगे।

राष्ट्रीय एकता एवं समता के प्रति निष्ठावान रहेंगे। जाति, लिंग, भाषा, प्रान्त, सम्प्रदाय आदि के कारण परस्पर कोई भेद-भाव न बरतेंगे।

'मनुष्य अपने भाग्य का निर्माता आप है, इस विश्वास के आधार पर हमारी मान्यता है कि हम उत्कृष्ट बनेंगे और दूसरों को श्रेष्ठ बनायेंगे तो युग अवश्य बदलेगा।

"हम बदलेंगे-युग बदलेगा" "हम सुधरेंगे-युग सुधरेगा" इस तथ्य पर हमारा परिपूर्ण विश्वास है।

*

मुद्रकः— युगान्तर चेतना प्रेस, शान्ति कुञ्ज, हरिद्वार।

Free Read/Download & Order 3000+ books authored by Yugrishi Pt. Shriram Sharma Acharya(Founder of All World Gayatri Pariwar) on all aspects of life in Hindi, Gujarati, English, Marathi & other languages at
www.vicharkrantibooks.org http://literature.awgp.org